CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीहरिः

श्रीसूर्यसहस्रनामस्तोत्रम्

पं० प्रेम दत्त शास्त्री

हांगीराबाद २०२३६४
बुलन्दशहर (जीवित) प्रेस, गोरखपुर

मूल्य पंद्रह पैसे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीहरिः

श्रीसूर्यसहस्रनामस्तोत्रम्

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २३६४
बुलन्दशहर (उ०प्र०)

गीताप्रेस, गोरखपुर

Kirtikant Sharma Collection
24.12.80

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मुद्रक तथा प्रकाशक—मोतीलाल जालान, गीताप्रेस, गोरखपुर

[भारत-सरकारद्वारा उपलब्ध कराये गये रियायती मूल्यके कागजपर मुद्रित]

सं०	२०१६ से २०३३ तक		३५,०००
सं०	२०३६	सप्तम संस्करण	२५,०००
		कुल	६०,०००

मूल्य पंद्रह पैसे

पता—गीताप्रेस, पो० गीताप्रेस (गोरखपुर)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीसूर्याय नमः

श्रीसूर्यसहस्रनामस्तोत्रम्

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३२४
बुलन्दशहर (उ०प्र०)

शतानीक उवाच

नाम्नां सहस्रं सवितुः श्रोतुमिच्छामि हे द्विज ।
येन ते दर्शनं यातः साक्षाद् देवो दिवाकरः ।१।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुमन्तुरुवाच

सर्वमङ्गलमङ्ग्ल्यं सर्वपापप्रणाशनम् ।
स्तोत्रमेतन्महापुण्यं सर्वोपद्रवनाशनम् ॥२॥
न तदास्ति भयं किंचिद् यदनेन न नश्यति
ज्वराद्यैर्मुच्यते राजन् स्तोत्रेऽस्मिन् पठिते नरः
अन्ये च रोगाः शाम्यन्ति पठतः शृण्वतस्तथा
सम्पद्यन्ते यथा कामाः सर्व एव यथेप्सिताः ४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

य एतदादितः श्रुत्वा संग्रामं प्रविशेन्नरः ।
स जित्वा समरे शत्रूनभ्येति गृहमक्षतः ॥५॥

वन्ध्यानां पुत्रजननं भीतानां भयनाशनम् ।
भूतिकारि दरिद्राणां कुष्ठिनां परमौषधम् ६
बालानां चैव सर्वेषां ग्रहरक्षोनिवारणम् ।
पठते संयतो राजन् स श्रेयः परमाप्नुयात् ७
स सिद्धः सर्वसंकल्पः सुखमत्यन्तमश्नुते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धर्मार्थिभिर्धर्मलुब्धैः सुखाय च सुखार्थिभिः ॥
राज्याय राज्यकामैश्च पठितव्यमिदं नरैः ।
विद्यावहं तु विप्राणां क्षत्रियाणां जयावहम् ९
पश्वावहं तु वैश्यानां शूद्राणां धर्मवर्द्धनम् ।
पठतां शृण्वतामेतद् भवतीति न संशयः १०
तच्छृणुष्व नृपश्रेष्ठ प्रयतात्मा ब्रवीमि ते ।
नाम्नां सहस्रं विख्यातं देवदेवस्य भास्वतः ११

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्य श्रीसूर्यसहस्रनामस्तोत्रस्य वेदव्यास ऋषिरनुष्टुप् छन्दः, सविता देवता, अभीष्टसिद्ध्यर्थे जपे विनियोगः ।

ॐ विश्वविद् विश्वजित्कर्ता विश्वात्मा विश्वतोमुखः ।
विश्वेश्वरो विश्वयोनिर्नियतात्मा जितेन्द्रियः ॥
कालाश्रयः कालकर्ता कालहा कालनाशनः ।
महायोगी महासिद्धिर्महात्मा सुमहाबलः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रभुर्विभुर्भूतनाथो भूतात्मा भुवनेश्वरः ।
भूतभव्यो भावितात्मा भूतान्तःकरणं शिवः ॥
शरण्यः कमलानन्दो नन्दनो नन्दवर्द्धनः ।
वरेण्यो वरदो योगी सुसंयुक्तः प्रकाशकः ॥ १५
प्राप्तयानः परप्राणः पूतात्मा प्रयतः प्रियः ।
नयः सहस्रपात् साधुर्दिव्यकुण्डलमण्डितः ॥
अव्यङ्गधारी धीरात्मा सविता वायुवाहनः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समाहितमतिर्दाता विधाता कृतमङ्गलः ॥
कपर्दी कल्पपाद् रुद्रः सुमना धर्मवत्सलः ।
समायुक्तो विमुक्तात्मा कृतात्मा कृतिनां वरः ॥
अविचिन्त्यवपुः श्रेष्ठो महायोगी महेश्वरः ।
कान्तःकामारिरादित्यो नियतात्मा निराकुलः
सप्तसप्तिरचिन्त्यात्मा महाकारुणिकोत्तमः ।
संजीवनो जीवनाथो जयो जीवो जगत्पतिः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अयुक्तो विश्वनिलयः संविभागी वृषध्वजः ।
वृषाकपिः कल्पकर्ता कल्पान्तकरणो रविः ॥
एकचक्ररथो मौनी सुरथो रथिनां वरः ।
सक्रोधनो रश्मिमाली तेजोराशिर्विभावसुः ॥
दिव्यकृद् दिनकृद् देवो देवदेवो दिवस्पतिः ।
दीननाथो हरो होता दिव्यबाहुर्दिवाकरः २३
यज्ञो यज्ञपतिः पूषा स्वर्णरेताः परावरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परापरज्ञस्तरणिरंशुमाली मनोहरः ॥२४॥
प्राज्ञः प्राज्ञपतिः सूर्यः सविता विष्णुरंशुमान् ।
सदागतिर्गन्धवहो विहितो विधिराशुगः ।२५।
पतङ्गः पतगः स्थाणुर्विहङ्गो विहगो वरः ।
हर्यश्वो हरिताश्वश्च हरिदश्वो जगत्प्रियः २६
त्र्यम्बकः सर्वदमनो भावितात्मा भिषग्वरः।
आलोककृल्लोकनाथो लोकालोकनमस्कृतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कालः कल्पान्तको वह्निस्तपनः सम्प्रतापनः ।
विलोचनो विरूपाक्षः सहस्राक्षः पुरंदरः २८
सहस्ररश्मिर्मिहिरो विविधाम्बरभूषणः ।
खगः प्रतर्दनो धन्यो हयगो वागविशारदः ॥
श्रीमानशिशिरो वाग्मी श्रीपतिः श्रीनिकेतनः
श्रीकण्ठः श्रीधरः श्रीमान् श्रीनिवासो वसुप्रदः ॥
कामचारी महामायो महोग्रोऽविदितामयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तीर्थकृत्कियावान् सुनयो विमुक्तो भक्तवत्सलः ॥
कीर्तिःकीर्तिकरो नित्यः कुण्डली कवची रथी ।
हिरण्यरेताः सप्ताश्वः प्रयतात्मा परंतपः ॥
बुद्धिमानमरश्रेष्ठो रोचिष्णुः पाकशासनः ।
समुद्रो धनदो धाता मान्धाता कश्मलापहः ॥
तमोघ्नो ध्वान्तहा वह्निर्होतान्तकरणो गुहः ।
पशुमान् प्रयतानन्दो भूतेशः श्रीमतां वरः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2

नित्यादितो नित्यरथः सुरेशः सुरपूजितः ।
अजितो विजितो जेता जङ्गमस्थावरात्मकः ॥
जीवानन्दो नित्यगामी विजेता विजयप्रदः ।
पर्जन्योऽग्निः स्थितिः स्थेयः स्थविरोऽथ निरञ्जनः॥
प्रद्योतनो रथारूढः सर्वलोकप्रकाशकः ।
ध्रुवो मेषी महावीर्यो हंसः संसारतारकः ३७
सृष्टिकर्ता क्रियाहेतुर्मार्तण्डो मरुतां पतिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मरुत्वान् दहनस्त्वष्टा भगो भगोऽर्यमा कपिः॥
वरुणेशो जगन्नाथः कृतकृत्यः सुलोचनः।
विवस्वान् भानुमान् कार्यः कारणस्तेजसां निधिः॥
असङ्गगामी तिग्मांशुर्घर्मांशुर्दीप्तदीधितिः।
सहस्रदीधितिर्ब्रध्नः सहस्रांशुर्दिवाकरः॥४०॥
गभस्तिमान् दीधितिमान् स्रग्वी मणिकुलद्युतिः।
भास्करः सुरकार्यज्ञः सर्वज्ञस्तीक्ष्णदीधितिः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुरज्येष्ठः सुरपतिर्बहुज्ञो वचसाम्पतिः ।
तेजोनिधिर्बृहत्तेजा बृहत्कीर्तिर्बृहस्पतिः ।४२।
अहिमान्नूर्जितो धीमानामुक्तः कीर्तिवर्द्धनः ।
महावैद्यो गणपतिर्धनेशो गणनायकः ॥४३॥
तीव्रः प्रतापनस्तापी तापनो विश्वतापनः ।
कार्तस्वरो हृषीकेशः पद्मानन्दोऽतिनन्दितः॥
पद्मनाभोऽमृताहारः स्थितिमान् केतुमान् नभः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनाद्यन्तोऽच्युतो विश्वो विश्वामित्रो घृणिर्विराट् ॥
आमुक्तकवचो वाग्मी कञ्चुकी विश्वभावनः ।
अनिमित्तगतिः श्रेष्ठः शरण्यः सर्वतोमुखः ॥
विगाही वेणुरसहः समायुक्तः समाक्रतुः ।
धर्मकेतुर्धर्मरतिः संहर्ता संयमो यमः ।
प्रणतार्तिहरो वायुः सिद्धकार्यो जनेश्वरः ४७
नभोविगाहनः सत्यः सवितात्मा मनोहरः ।

 Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हारी हरिर्हरो वायुर्ऋतुः कालानलद्युतिः ॥
सुखसेव्यो महातेजा जगतामेककारणम् ।
महेन्द्रो विष्टुतः स्तोत्रं स्तुतिहेतुः प्रभाकरः ॥
सहस्रकर आयुष्मान् रोगदः सुखदः सुखी ।
व्याधिहा सुखदः सौख्यं कल्याणं कलतां वरः
आरोग्यकारणं सिद्धिर्ऋद्धिर्वृद्धिर्बृहस्पतिः ।
हिरण्यरेता आरोग्यं विद्वान् ब्रध्नो बुधो महान्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राणवान् धृतिमान् घर्मो घर्मकर्ता रुचिप्रदः।
सर्वप्रियः सर्वसहः सर्वशत्रुविनाशनः ॥५२॥
प्रांशुर्विद्योतनो द्योतः सहस्रकिरणः कृती।
केयूरी भूषणोद्भासी भासितो भासनोऽनलः॥
शरण्यार्तिहरो होता खद्योतः खगसत्तमः।
सर्वद्योतो भवद्योतः सर्वद्युतिकरो मतः ॥५४॥
कल्याणः कल्याणकरः कल्यः कल्यकरः कविः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कल्याणकृत् कल्यवपुः सर्वकल्याणभाजनम्
शान्तिप्रियः प्रसन्नात्मा प्रशान्तः प्रशमप्रियः
उदारकर्मा सुनयः सुवर्चा वर्चसोज्ज्वलः ५६
वर्चस्वी वर्चसामीशस्त्रैलोक्येशो वशानुगः ।
तेजस्वी सुयशा वर्ष्मी वर्णाध्यक्षो बलिप्रियः ॥
यशस्वी तेजोनिलयस्तेजस्वी प्रकृतिस्थितः ।
आकाशगः शीघ्रगतिराशुगो गतिमान् खगः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गोपतिर्ग्रहदेवेशो गोमानेकः प्रभञ्जनः ।
जानिता प्रजनो जीवो दीपः सर्वप्रकाशकः ॥
सर्वसाक्षी योगनित्यो नभस्वानसुरान्तकः ।
रक्षोघ्नो विघ्नशमनः किरीटी सुमनः प्रियः ॥
मरीचिमाली सुमतिः कृताभिख्याविशेषकः ।
शिष्टाचारःशुभाचारःस्वचाराचारतत्परः ।६१।
मन्दारो माठरो वेणुः क्षुधापः क्ष्मापतिर्गुरुः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुविशिष्टो विशिष्टात्मा विधेयो ज्ञानशोभनः ॥
महाश्वेतः प्रियो ज्ञेयः सामगो मोक्षदायकः ।
सर्ववेदप्रगीतात्मा सर्ववेदलयो महान् ॥६३॥
वेदमूर्तिश्चतुर्वेदो वेदभृद् वेदपारगः ।
क्रियावानसितो जिष्णुर्वरीयांशुर्वरप्रदः ॥६४॥
व्रतचारी व्रतधरो लोकबन्धुरलंकृतः ।
अलंकारोऽक्षरो वेद्यो विद्यावान् विदिताशयः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आकारो भूषणो भूष्यो भूष्णुर्भुवनपूजितः ।
चक्रपाणिर्ध्वजधरः सुरेशो लोकवत्सलः ।६६।
वाग्मिपतिर्महाबाहुः प्रकृतिर्विकृतिर्गुणः ।
अन्धकारापहः श्रेष्ठो युगावर्तो युगादिकृत् ६७
अप्रमेयः सदायोगी निरहंकार ईश्वरः ।
शुभप्रदः शुभः शास्ता शुभकर्मा शुभप्रदः ॥
सत्यवाञ् श्रुतिमानुच्चैर्नकारो वृद्धिदोऽनलः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बलभृद् बलदो बन्धुर्मतिमान् बलिनां वरः ॥
अनङ्गो नागराजेन्द्रः पद्मयोनिर्गणेश्वरः ।
संवत्सर ऋतुर्नेता कालचक्रप्रवर्तकः ॥७०॥
पद्मेक्षणः पद्मयोनिः प्रभावानमरः प्रभुः ।
सुमूर्तिः सुमतिः सोमो गोविन्दो जगदादिजः॥
पीतवासाः कृष्णवासा दिग्वासास्त्विन्द्रियातिगः ।
अतीन्द्रियोऽनेकरूपः स्कन्दः परपुरंजयः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शक्तिमाञ्जलधृग् भास्वान् मोक्षहेतुरयोनिजः।
सर्वदर्शी जितादर्शो दुःस्वप्नाशुभनाशनः ७३
मङ्गल्यकर्ता तरणिर्वैगवान् कश्मलापहः ।
स्पष्टाक्षरो महामन्त्रो विशाखो यजनप्रियः॥
विश्वकर्मा महाशक्तिर्द्युतिरीशो विहङ्गमः ।
विचक्षणो दक्ष इन्द्रः प्रत्यूषः प्रियदर्शनः ७५
अखिन्नो वेदनिलयो वेदविद् विदिताशयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रभाकरो जितरिपुः सुजनोऽरुणसारथिः ।७६।
कुनाशी सुरतः स्कन्दो महितोऽभिमतो गुरुः।
ग्रहराजो ग्रहपतिर्ग्रहनक्षत्रमण्डलः ॥७७॥
भास्करः सततानन्दो नन्दनो नरवाहनः ।
मङ्गल्यचारुचरितः शीर्णः सर्वव्रतो व्रती ।७८।
चतुर्मुखः पद्ममाली पूतात्मा प्रणतार्तिहा ।
अकिंचनः सतामीशो निर्गुणो गुणवाञ्शुचिः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्पूर्णः पुण्डरीकाक्षो विधेयो योगतत्परः ।
सहस्रांशुः क्रतुमतिः सर्वज्ञः सुमतिः सुवाक् ॥
सुवाहनो माल्यदामा कृताहारो हरिप्रियः ।
ब्रह्मा प्रचेताः प्रथितः प्रयतात्मा स्थिरात्मकः ॥
शतविन्दुः शतमुखो गरीयाननलप्रभः ।
धीरो महत्तरो विप्रः पुराणपुरुषोत्तमः ॥८२॥
विद्याराजाधिराजो हि विद्यावान् भूतिदः स्थितः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनिर्देश्यवपुः श्रीमान् विपाप्मा बहुमङ्गलः ॥
स्वःस्थितः सुरथः स्वर्णो मोक्षदो बलिकेतनः ।
निर्द्वन्द्वो द्वन्द्वहा स्वर्गः सर्वगः सम्प्रकाशकः ॥
दयालुः सूक्ष्मधीः क्षान्तिः क्षेमाक्षेमस्थितिप्रियः ।
भूधरो भूपतिर्वक्ता पवित्रात्मा त्रिलोचनः ८५
महावराहः प्रियकृद् दाता भोक्ताभयप्रदः ।
चक्रवर्ती धृतिकरः सम्पूर्णोऽथ महेश्वरः ८६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चतुर्वेदधरोऽचिन्त्यो विनिन्द्यो विविधाशनः ।
विचित्ररथ एकाकी सप्तसप्तिः परापरः ॥७७॥
सर्वोदधिस्थितिकरः स्थितिस्थेयः स्थितिप्रियः
निष्कलः पुष्कलो विभुर्वसुमान् वासवप्रियः॥
पशुमान् वासवस्वामी वसुधामा वसुप्रदः ।
बलवाञ् ज्ञानवांस्तत्त्वमोंकारास्त्रिषु संस्थितः ॥
संकल्पयोनिर्दिनकृद् भगवान् कारणापहः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नीलकण्ठो धनाध्यक्षश्चतुर्वेदप्रियंवदः ॥९०॥
वषट्कारोद्गाता होता स्वाहाकारो हुताहुतिः ।
जनार्दनो जनानन्दो नरो नारायणोऽम्बुदः ॥
संदेहनाशनो वायुर्धन्वी सुरनमस्कृतः ।
विग्रही विमलो विन्दुर्विशोको विमलद्युतिः॥
द्युतिमान् द्योतनो विद्युद् विद्यावान् विदितो बली ।
धर्मदो हिमदो हासः कृष्णवर्त्मा सुताजितः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सावित्री भावितो राजा विश्वामित्रो घृणिर्विराट्
सप्तार्चिः सप्ततुरगः सप्तलोकनमस्कृतः ।९४।
सम्पूर्णोऽथ जगन्नाथः सुमनाः शोभनप्रियः ।
सर्वात्मा सर्वकृत् सृष्टिः सप्तिमान् सप्तमीप्रियः
सुमेधा मेधिको मेध्यो मेधावी मधुसूदनः ।
अङ्गिरः पतिः कालज्ञो धूमकेतुः सुकेतनः ॥
सुखी सुखप्रदः सौख्यः कान्तिः कान्तिप्रियो मुनिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संतापनः संतपन आतपस्तपसां पतिः ॥९७॥
उमापतिः सहस्रांशुः प्रियकारी प्रियंकरः ।
प्रीतिर्विमन्युरम्भोत्थः खञ्जनो जगतां पतिः॥
जगत्पिता प्रीतमनाः सर्वः खर्वो गुहोऽचलः ।
सर्वगो जगदानन्दो जगन्नेता सुरारिहा ।९९।
श्रेयः श्रेयस्करो ज्यायान् महानुत्तम उद्भवः।
उत्तमो मेरुमेयोऽथ धरणो धरणीधरः॥१००॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धराध्यक्षो धर्मराजो धर्मोधर्मप्रवर्त्तकः ।
रथाध्यक्षो रथगतिस्तरुणस्तानितोऽनलः १०१
उत्तरोऽनुत्तरस्तापी अवाक्पतिरपाम्पतिः ।
पुण्यसंकीर्तनः पुण्यो हेतुर्लोकत्रयाश्रयः ॥
स्वर्भानुर्विगतानन्दो विशिष्टोत्कृष्टकर्मकृत् ।
व्याधिप्रणाशनः क्षेमः शूरः सर्वजितां वरः ॥
एकरथो रथाधीशः पिता शनैश्चरस्य हि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वैवस्वतगुरुर्मृत्युर्धर्मनित्यो महाव्रतः ॥१०४॥
प्रलम्बहारसंचारी प्रद्योतो द्योतितानलः ।
संतापहृत् परो मन्त्रो मन्त्रमूर्तिर्महाबलः ॥
श्रेष्ठात्मा सुप्रियः शम्भुर्मरुतामीश्वरेश्वरः ।
संसारगतिविच्छेत्ता संसारार्णवतारकः ।१०६।
सप्तजिह्वः सहस्रार्ची रत्नगर्भोऽपराजितः ।
धर्मकेतुरमेयात्मा धर्माधर्मवरप्रदः ॥१०७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकसाक्षी लोकगुरुर्लोकेशश्चण्डवाहनः ।
धर्मयूपो यूपवृक्षो धनुष्पाणिर्धनुर्धरः ॥१०८॥
पिनाकधृज्महोत्साहो महामायो महाशनः ।
वीरः शक्तिमतां श्रेष्ठः सर्वशस्त्रभृतां वरः ॥
ज्ञानगम्यो दुराराध्यो लोहिताङ्गो विवर्द्धनः ।
खगोऽन्धो धर्मदो नित्यो धर्मकृच्चित्रविक्रमः ॥
भगवानात्मवान् मन्त्रस्त्र्यक्षरो नीललोहितः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकोऽनेकस्त्रयी कालः सविता सामितिंजयः ॥
शार्ङ्गधन्वानलो भीमः सर्वप्रहरणायुधः ।
सुकर्मा परमेष्ठी च नाकपाली दिविस्थितः ॥
वदान्यो वासुकिर्वैद्य आत्रेयोऽथ पराक्रमः ।
द्वापरः परमोदारः परमो ब्रह्मचर्यवान् ।११३।
उदीच्यवेशो मुकुटी पद्महस्तो हिमांशुभृत् ।
सितः प्रसन्नवदनः पद्मोदरनिभाननः ।११४।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सायं दिवा दिव्यवपुरनिर्देश्यो महालयः ॥
महारथो महानीशः शेषः सत्त्वरजस्तमः ॥
धृतातपत्रप्रतिमो विमर्षी निर्णयः स्थितः ।
अहिंसकः शुद्धमतिरद्वितीयो विवर्द्धनः ११६
सर्वदो धनदो मोक्षो विहारी बहुदायकः ।
चारुरात्रिहरो नाथो भगवान् सर्वगोऽव्ययः ॥
मनोहरवपुः शुभ्रः शोभनः सुप्रभावनः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुप्रभावः सुप्रतापः सुनेत्रो दिग्विदिक्पतिः॥
राज्ञीप्रियः शब्दकरो ग्रहेशस्तामिरापहः।
सैंहिकेयरिपुर्दैवो वरदो वरनायकः॥११९॥
चतुर्भुजो महायोगी योगीश्वरपतिस्तथा।
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि।
नाम्नां सहस्रं सवितुः पराशर्यो यदाह मे॥
धन्यं यशस्यमायुष्यं दुःखदुःस्वप्ननाशनम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बन्धमोक्षकरं चैव भानोर्नामानुकीर्तनात् १२१ ।
यस्त्विदं शृणुयान्नित्यं पठेद् वा प्रयतो नरः ।
अक्षयं स्वर्गमाप्नोति भवेत्तस्योपसाधितम् ॥
नृपाग्नितस्करभयं व्याधितो न भयं भवेत् ।
विजयी च भवेन्नित्यमाश्रयं परमाप्नुयात् ॥
कीर्तिमान् सुभगो विद्वान् स सुखी प्रियदर्शनः
जीवेद् वर्षशतायुश्च सर्वव्याधिविवर्जितः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नाम्नां सहस्रमिदमंशुमतः पठेद् यः
प्रातः शुचिर्नियमवान् सुसमृद्धियुक्तः ।
दूरेण तं परिहरन्ति सदैव रोगा
भूताःसुपर्णमिव सर्वमहोरगेन्द्राः १२९

इति भविष्यपुराणे सप्तमकल्पे श्रीभगवत्सूर्यस्य
सहस्रनामस्तोत्रं सम्पूर्णम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ०प्र०)

मिलनेका पता
गीताप्रेस, पो० गीताप्रेस (गोरखपुर)

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ०प्र०)

Kirtikant Sharma Collection, Najafgarh